Sri Sathya Sai Sadhana Trust
Publications Division,Prasanthi Nilayam

# CHAMAKAM

*10th Anuvaka*

गर्भाश्च मे वत्साश्च मे

garbhāśca me vatsāśca me

त्र्यविश्च मे त्र्यवीच मे

tryaviśca me tryavīca me

दित्यवाट् च मे दित्यौही च मे

dityavāṭ ca me dityauhī ca me

पञ्चाविश्च मे पञ्चावी च मे

pañcā viśca me pañcāvī ca me

त्रिवत्सश्च मे त्रिवत्सा च मे

trivatsaśca me trivatsā ca me

तुर्यवाट् च मे तुर्यौही च मे

turyavāṭ ca me turyauhī ca me

पष्ठवाट् च मे पष्ठौही च म

paṣṭhavāṭ ca me paṣṭhauhī ca ma

उक्षा च मे वशा च म

ukṣā ca me vaśā ca ma

ऋषभश्च मे वेहच्च मे

ṛṣabhaśca me vehacca me

अनड्वाञ्च मे धेनुश्च म

anaḍvāñca me dhenuśca ma

आयुर्यज्ञेन कल्पतां

āyuryajñena kalpatāṁ

प्राणो यज्ञेन कल्पतां

prāṇo yajñena kalpatāṁ

अपानो यज्ञेन कल्पतां

apāno yajñena kalpatāṁ

व्यानो यज्ञेन कल्पतां

vyāno yajñena kalpatāṁ

चक्षुर्यज्ञेन कल्पताग्ं

cakṣuryajñena kalpatāgṁ

श्रोत्रं यज्ञेन कल्पतां

śrotraṁ yajñena kalpatāṁ

मनो यज्ञेन कल्पतां

mano yajñena kalpatāṁ

वाग्यज्ञेन कल्पतामात्मा

vāgyajñena kalpatāmātmā

यज्ञेन कल्पतां

yajñena kalpatāṁ

यज्ञो यज्ञेन कल्पताम् ॥१० ॥

yajño yajñena kalpatām ||10||

Sri Sathya Sai Sadhana Trust Publications Division